## अलोऽन्त्यात् पूर्व उपधा । (६५/२४९)

धात्वादौ वर्णसमुदायेऽन्त्यादलः [1]पूर्वो यो वर्णः सो[2]ऽल् एव उपधासञ्ज्ञो भवति । पच्, पठ्–अकारः । [3]भिद्, छिद्–इकारः । बुध्, युध्[4]–उकारः । वृत्, वृध्–ऋकारः । अलः इति किम्? शिष्टः[5], शिष्टवान् (म.भा. १. १६६) । समुदायात् पूर्वस्य मा भूत् । [6]उपधाप्रदेशाः– 'अत उपधायाः' (७.२.११५/२२८२) इत्येवमादयः ॥

## तस्मिन्निति निर्दिष्टे पूर्वस्य । (६६/४०)

तस्मिन् इति [7]सप्तम्यर्थनिर्देशे पूर्वस्यैव कार्यं भवति, नोत्तरस्य । 'इको यणचि' (६.१.७७/४७)–दध्युदकम् । [8]मध्विदम् । पचत्योदनम् । निर्दिष्टग्रहणमान[9]न्तर्यार्थम् । अग्निचिदत्र इति व्यवहितस्य मा भूत् ॥

## तस्मादित्युत्तरस्य । (६७/४१)

निर्दिष्टग्रहणम् [10]अनुवर्तते । तस्मात् इति पञ्चम्य[11]र्थनिर्देश उत्तरस्यैव कार्यं भवति, न पूर्वस्य । 'तिङ्ङतिङः' (८.१.२८/३९३५)–[12]ओदनं पचति । इह न[13] भवति– पचत्योदनम् [14]इति ॥

## स्वं रूपं शब्दस्याशब्दसञ्ज्ञा । (६८/२५)

[15]शास्त्रे स्वमेव [16]रूपं शब्दस्य ग्राह्यं बोध्यं[17] प्रत्याय्यं भवति,[18] न[19] बाह्योऽर्थः, शब्दसञ्ज्ञां वर्जयित्वा । शब्देनार्था[20]वगतेरर्थे कार्यस्या[21]सम्भवात् तद्वाचिनां शब्दानां सम्प्रत्ययो मा भूत् इति सूत्रमि[22]दमारभ्यते । 'अग्नेर्ढक्' (४.२.३३/१२३६)–'आग्नेयमष्टाकपालं[23] निर्वपेत्' (वै.श्रौ.सू. १.१९) । अग्निशब्दोऽग्निशब्दस्यैव ग्राहको भवति, न[24] ज्वलनः, पावकः, धूमकेतुः इति । नातः प्रत्ययो भवति । '[25]उदश्वितोऽन्यतरस्याम्' (४.२.१९/१२२०)–औदश्वित्कम्[26] । औदश्वितम् । तक्रम्, अरिष्टं, [27]कालशेयं, दण्डाहतं, [28]मथितम् इति नातः प्रत्ययो भवति । अशब्दसञ्ज्ञा इति किम्? 'दाधा घ्वदाप्' (१.१.२०/२३७३), 'तरप्तमपौ घः' (१.१.२३/२००३), [29]घुग्रहणेषु घग्रहणेषु च सञ्ज्ञिनां[30] ग्रहणम्, न सञ्ज्ञायाः ।

[८] सित्तद्विशेषाणां वृक्षाद्यर्थम् । (म.भा. १.१७६)

[31]सिन्निर्देशः कर्तव्यः । ततो वक्तव्यम् तद्विशेषाणां ग्रहणं भवति इति । किं प्रयोजनम्? वृक्षाद्यर्थम् । 'विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्' (२.४.१२/९१६) इति–प्लक्षन्यग्रोधम्[32], प्लक्ष-न्यग्रोधाः ।

---

1. पूर्वोऽलेव क. ड. फ, पूर्वो वर्णः ह. 2. स उपधासञ्ज्ञः ब, नास्ति ह. 3. भिदि । छिदि ग. 4. युध् नास्ति फ. 5. शिष्टः नास्ति ग. 6. तेन शकारस्य इकारो न भवति इत्यधिकम ग, तेन शकारस्य संश्रयो न भवति इत्यधिकम् ह. 7. सप्तमीनिर्देशे ड, सप्तम्यर्थे निर्देशे ह. 8. नास्ति ग. 9. आनन्त्यस्यार्थम् ग. 10. इह इत्यधिकम् ह. 11. पञ्चम्यन्तनिर्देशे उत्तरस्यैव ह. 12. इति इत्यधिकम् फ, तिङः ह. 13. तु न फ. 14. इति नास्ति फ. 15. इह इत्यधिकम् ग. ड. फ. ह. 16. स्वं रूपमेव ग. 17. बोद्धव्यं ग. ह. 18. इत्यर्थः इत्यधिकम् ह. 19. न तु ग. 20. अर्थगतेः क. 21. असंभाविनां शब्दानाम् ह. 22. इदं नास्ति क. 23. पुरोडाशं इत्यधिकम् ड. 24. न नास्ति ब. क, न अनलः ग. 25. उदश्वितो––नातः प्रत्ययो भवति नास्ति ब. 26. नास्ति अ.क, औदश्वित्कः ग. ह, औदश्वितम् नास्ति ह. 27. कालसेयं ड, नास्ति ग. 28. दण्डाहत्याशेषम् ग. 29. इति इत्यधिकम् ग. 30. संज्ञिनः क. ड. 31. सिनिर्देशः क. ह. 32. नास्ति ब, प्लक्षश्चासौ न्यग्रोधश्च प्लक्षन्यग्रोधौ ह.